# Turajapuranivasini Stotram

# તુરજાપુરનિવસિનીસ્તોત્રમ્

## Document Information

Text title : turajApuravAsinIstotram

File name : turajApuravAsinIstotram.itx

Category : devii, stotra, vAsudevAnanda-sarasvatI, devI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Transliterated by : Kaushal S. Kaloo

Proofread by : Kaushal S. Kaloo

Description-comments : From stotrAdisangraha

Latest update : May 8, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 8, 2021

*sanskritdocuments.org*

# Turajapuranivasini Stotram

# તુરજાપુરનિવસિનીસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
નમસ્તેઽસ્તુ તે મહાદેવિ શિવે કલ્યાણશામ્ભવિ ।
પ્રસીદ વેદવિનુતે  જગદમ્બ નમોઽસ્તુ તે ॥ ૧॥

જગતામાદિભૂતા ત્વં જગત્ત્વં જગદાશ્રયા ।
એકાઽપ્યનેકરૂપાઽસિ જગદમ્બ નમોઽસ્તુ તે ॥ ૨॥

સૃષ્ટિસ્થિતે વિનાશાનાં  હેતુભૂતે મુનિસ્તુતે ।
પ્રસીદ દેવવિનુતે જગદમ્બ નમોઽસ્તુ તે ॥ ૩॥

સર્વેશ્વરિ નમસ્તુભ્યં સર્વસૌભાગ્યદાયિનિ ।
સર્વશક્તિયુતેઽનન્તે જગદમ્બ નમોઽસ્તુ તે ॥ ૪॥

વિવિધારિષ્ટશમનિ ત્રિવિધોત્પાતનાશિનિ ।
પ્રસીદ દેવિ લલિતે જગદમ્બ નમોઽસ્તુ તે ॥ ૫॥

પ્રસીદ કરુણાસિન્ધો ત્વત્તઃ કારુણિકા પરા ।
યતો નાસ્તિ મહાદેવિ જગદમ્બ નમોઽસ્તુ તે ॥ ૬॥

શત્રૂઞ્જહિ જયં દેહિ સર્વાન્ કામાંશ્ચ દેહિ મે ।
ભયં નાશય રોગાંશ્ચ જગદમ્બ નમોઽસ્તુ તે ॥ ૭॥

જગદમ્બ નમોઽસ્તુ તે હિતે જય શમ્ભોર્દયિતે મહામતે ।
કુલદેવિ નમોઽસ્તુ તે સદા હૃદિ મે તિષ્ઠ યતોઽસિ સર્વદા ॥ ૮॥

તુલજાપુરનિવાસિન્યાઃ દેવ્યાઃ સ્તોત્રમિદં પરમ્ ।
યઃ પઠેત્પ્રયતો ભક્ત્યા સર્વાન્ કામાન્ સ આપ્નુયાત્ ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીપણ્ડિતવિરચિતં
તુરજાપુરનિવસિન્યા દેવ્યાઃ સ્તોત્રં સમ્પૂર્ણમ્ ॥

તુલજાપુરનિવસિનીસ્તોત્રમ્, તુળજાપુરનિવસિનીસ્તોત્રમ્

Encoded and proofread by Kaushal S. Kaloo

*Turajapuranivasini Stotram*

pdf was typeset on May 8, 2021

Please send corrections to *sanskrit@cheerful.com*